# ईशावास्योपनिषद्

ॐ पूर्ण॒मदः॒ पूर्ण॒मिदं॒ पूर्णा॒त्पूर्ण॒मुद॒च्यते ।
पूर्ण॒स्य पूर्ण॒मादा॒य पूर्ण॒मेवावशि॒ष्यते ॥

ॐ शा॒न्तिः शा॒न्तिः शा॒न्तिः ॥

ॐ ई॒शा वा॒स्य॑मि॒दग्ं सर्वं॒ यत्किञ्च॒ जग॑त्वां॒ जग॑त् ।
तेन॑ त्य॒क्तेन॑ भुञ्जीथा॒ मा गृ॑धः॒ कस्य॑स्वि॒द्धनम् ॥ 1 ॥

कु॒र्वन्ने॒वेह कर्मा॑णि जिजीवि॒षेच्छ॒तग्ं समाः॑ ।
ए॒वं त्वयि॒ नान्यथे॒तो॑ऽस्ति॒ न कर्म॑ लिप्यते॒ नरे॑ ॥ 2 ॥

अ॒सु॒र्या॒ नाम॒ ते लो॒का अ॒न्धेन॒ तम॒साऽऽवृ॑ताः ।
ताग्ंस्ते प्रेत्या॒भिग॑च्छन्ति॒ ये के चा॑त्म॒हनो॒ जनाः॑ ॥ 3 ॥

अने॑ज॒देकं॒ मन॑सो॒ जवी॑यो॒ नैन॑द्दे॒वा आ॑प्नु॒वन्पूर्व॒मर्ष॑त् ।
तद्धाव॑तो॒ऽन्यानत्ये॑ति॒ तिष्ठ॒त्तस्मि॑न्न॒पो मा॑त॒रिश्वा॑ दधाति ॥ 4 ॥

तदे॑जति॒ तन्नैज॑ति॒ तद्दू॒रे तद्व॑न्ति॒के ।
तद॒न्तर॑स्य॒ सर्व॑स्य॒ तदु॒ सर्व॑स्यास्य बाह्य॒तः ॥ 5 ॥

यस्तु सर्वा॑णि भू॒तान्या॒त्मन्ये॒वानु॒पश्य॑ति ।
स॒र्व॒भू॒तेषु॑ चा॒त्मानं॒ ततो॒ न विजु॑गुप्सते ॥ 6 ॥

यस्मि॒न्सर्वा॑णि भू॒तान्या॒त्मैवाभू॑द्विजान॒तः ।
तत्र॒ को मोहः॒ कः शोक॑ एक॒त्वम॑नु॒पश्य॑तः ॥ 7 ॥

स पर्य॑गाच्छु॒क्रम॑का॒यम॑व्र॒णम॑स्नावि॒रꣳ शु॒द्धमपा॑पविद्धम् ।
क॒विर्म॑नी॒षी प॑रि॒भूः स्व॑य॒म्भूर्या॑थातथ्य॒तोऽर्था॒न्
व्य॑दधाच्छाश्व॒तीभ्यः॒ समा॑भ्यः ॥ 8 ॥

अ॒न्धं तमः॒ प्रवि॑शन्ति॒ येऽवि॑द्या॒मुपास॑ते ।
ततो॒ भूय॑ इव॒ ते तमो॒ य उ॑ वि॒द्याया॑ꣳ र॒ताः ॥ 9 ॥

अ॒न्यदे॒वाहुर्वि॒द्यया॒ऽन्यदा॑हु॒रवि॑द्यया ।
इति॑ शुश्रु॒म धीरा॑णां॒ ये न॒स्तद्वि॑चचक्षि॒रे ॥ 10 ॥

वि॒द्यां चावि॑द्यां च॒ यस्तद्वेदो॒भय॑ꣳ स॒ह ।
अवि॑द्यया मृ॒त्युं ती॒र्त्वा वि॒द्यया॒ऽमृत॑मश्नुते ॥ 11 ॥

अ॒न्धं तमः॒ प्रवि॑शन्ति॒ येऽस॑म्भूतिमु॒पास॑ते ।
ततो॒ भूय॑ इव॒ ते तमो॒ य उ॒ सम्भू॑त्याꣳ र॒ताः ॥ 12 ॥

अ॒न्यदे॒वाहुः स॑म्भ॒वाद॒न्यदा॑हु॒रस॑म्भवात् ।
इति॑ शुश्रु॒म धीरा॑णां॒ ये न॒स्तद्वि॑चचक्षि॒रे ॥ 13 ॥

सम्भू॑तिं च विना॒शं च॒ यस्तद्वेदो॒भय॑ꣳ स॒ह ।
वि॒ना॒शेन॑ मृ॒त्युं ती॒र्त्वा सम्भू॑त्या॒ऽमृत॑मश्नुते ॥ 14 ॥

हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम् ।
तत्वं पूषन्नपावृणु सत्यधर्माय दृष्टये ॥ 15 ॥

पूषन्नेकर्षे यम सूर्य प्राजापत्य व्यूह रश्मीन्
समूह तेजो यत्ते रूपं कल्याणतमं तत्ते पश्यामि ।
योऽसावसौ पुरुषः सोऽहमस्मि ॥ 16 ॥

वायुरनिलममृतमथेदं भस्मान्तं शरीरम् ।
ॐ 3 क्रतो स्मर कृतं स्मर क्रतो स्मर कृतं स्मर ॥ 17 ॥

अग्ने नय सुपथा राये अस्मान् विश्वानि देव वयनानि विद्वान् ।
युयोध्यस्मज्जुहुराणमेनो भूयिष्टां ते नमउक्तिं विधेम ॥ 18 ॥

ॐ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते ।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

Web Url: http://www.vignanam.org/veda/eesavasyopanishad-devanagari.html